# .. Laghu-Vakya-Vritti ..

# ॥ લઘુવાક્યવૃત્તિઃ ॥

## Document Information

Text title : Laghu Vakya Vritti
File name : laghuvak.itx
Location : doc_z_misc_shankara
Author : Adi Shankaracharya
Language : Sanskrit
Subject : vedanta/hinduism/religion
Transliterated by : Sunder Hattangadi (sunderh at hotmail)
Proofread by : Sunder Hattangadi (sunderh at hotmail)
Translated by : -
Description-comments : Abridged version of Vakyavritti
Latest update : Mar. 28, 2002 [Phalgun Pournima - 'Holi']
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ લઘુવાક્યવૃત્તિઃ ॥

સ્થૂલો માંસમયો દેહો સૂક્ષ્મઃ સ્યાદ્વાસનામયઃ ।
જ્ઞાનકર્મેન્દ્રિયૈઃ સાર્ધં ધીપ્રાણૌ તચ્છરીરગૌ ॥ ૧॥

અજ્ઞાનં કારણં સાક્ષી બોધસ્તેષાં વિભાસકઃ ।
બોધાભાસો બુદ્ધિગતઃ કર્તા સ્યાત્પુણ્યપાપયોઃ ॥ ૨॥

સ એવ સંસરેત્કર્મવશાલ્લોકદ્વયે સદા ।
બોધાભાસાચ્છુદ્ધબોધં વિવિચ્યાદતિયત્નતઃ ॥ ૩॥

જાગરસ્વપ્નયોરેવ બોધાભાસવિડમ્બના ।
સુપ્તૌ તુ તલ્લયે બોધઃ શુદ્ધો જાડ્યં પ્રકાશયેત્ ॥ ૪॥

જાગરેઽપિ ધિયસ્તૂષ્ણીમ્ભાવઃ શુદ્ધેન ભાસ્યતે ।
ધીવ્યાપારાશ્ચ ચિદ્ભાસ્યાશ્ચિદાભાસેન સંયુતાઃ ॥ ૫॥

વહ્નિતપ્તજલં તાપયુક્તં દેહસ્ય તાપકમ્ ।
ચિદ્ભાસ્યા ધીસ્તદાભાસયુક્તાન્યં ભાસયેત્તથા ॥ ૬॥

રૂપાદૌ ગુણદોષાદિવિકલ્પા બુદ્ધિગાઃ ક્રિયાઃ ।
તાઃ ક્રિયા વિષયૈઃ સાર્ધં ભાસયન્તી ચિતિર્મતા ॥ ૭॥

રૂપાચ્ચ ગુણદોષાભ્યાં વિવિક્તા કેવલા ચિતિઃ ।
સૈવાનુવર્તતે રૂપરસાદીનાં વિકલ્પને ॥ ૮॥

ક્ષણે ક્ષણેઽન્યથાભૂતા ધીવિકલ્પાશ્ચિતિર્ન તુ ।
મુક્તાસુ સૂત્રવદ્બુદ્ધિવિકલ્પેષુ ચિતિસ્તથા ॥ ૯॥

મુક્તાભિરાવૃતં સૂત્રં મુક્તયોર્મધ્ય ઈક્ષ્યતે ।
તથા વૃત્તિવિકલ્પૈશ્ચિત્સ્પષ્ટા મધ્યે વિકલ્પયોઃ ॥ ૧૦॥

નષ્ટે પૂર્વવિકલ્પે તુ યાવદન્યસ્ય નોદયઃ ।
નિર્વિકલ્પકચૈતન્યં સ્પષ્ટં તાવદ્વિભાસતે ॥ ૧૧॥

એકદ્વિત્રિક્ષણેષ્વેવં વિકલ્પસ્ય નિરોધનમ્ ।
ક્રમેણાભ્યસ્યતાં યત્નાદ્બ્રહ્માનુભવકાઙ્ક્ષિભિઃ ॥ ૧૨॥

સવિકલ્પજીવોઽયં બ્રહ્મ તન્નિર્વિકલ્પકમ્ ।
અહં બ્રહ્મેતિ વાક્યેન સોઽયમર્થોઽભિધીયતે ॥ ૧૩॥

સવિકલ્પકચિદ્યોઽહં બ્રહ્મૈકં નિર્વિકલ્પકમ્ ।
સ્વતઃસિદ્ધા વિકલ્પાસ્તે નિરોદ્ધવ્યાઃ પ્રયત્નતઃ ॥ ૧૪॥

શક્યઃ સર્વનિરોધેન સમાધિર્યોગિનં પ્રિયઃ ।
તદશક્તૌ ક્ષણં રુદ્ધ્વા શ્રદ્ધાલુર્બ્રહ્મતાત્મનઃ ॥ ૧૫॥

શ્રદ્ધાલુર્બ્રહ્મતાં સ્વસ્ય ચિન્તયેદ્બુદ્ધિવૃત્તિભિઃ ।
વાક્યવૃત્ત્યા યથાશક્તિ જ્ઞાત્વાદ્ધાભ્યસ્યતાં સદા ॥ ૧૬॥

તચ્ચિન્તનં તત્કથનમન્યોન્યં તત્પ્રબોધનમ્ ।
એતદેકપરત્વં ચ બ્રહ્માભ્યાસં વિદુર્બુધાઃ ॥ ૧૭॥

દેહાત્મધીવદ્બ્રહ્માત્મધીદાર્ઢ્યે કૃતકૃત્યતા ।
યદા તદાયં મ્રિયતાં મુક્તોઽસૌ નાત્ર સંશયઃ ॥ ૧૮॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
લઘુવાક્યવૃત્તિઃ સમ્પૂર્ણા ॥

Encoded by Sunder Hattangadi sunderh at hotmail.com

.. Laghu-Vakya-Vritti ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*